# shrISarasvatIstotra by Yajnyavalkya

# શ્રીસરસ્વતીસ્તોત્રં અથવા વાણીસ્તવનં યાજ્ઞવલ્ક્યોક્ત

## Document Information

Text title : sarasvatIstotra evaM vANIstavanaM yAjnavalkyokta

File name : sarasvatIstotrayAjnavalkyaBVP.itx

Category : devii, sarasvatI, stotra, devI, brahmavaivartapurANa

Location : doc_devii

Transliterated by : Singanallur Ganesan singanallur at gmail.com, PSA Easwaran

Proofread by : Singanallur Ganesan singanallur at gmail.com, PSA Easwaran

Description-comments : brahmavaivartapurANa prakRitikhaNDa and devIbhAgavatam navamaskandha both adhyAya 5

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 25, 2024

*sanskritdocuments.org*

# શ્રીસરસ્વતીસ્તોત્રં અથવા વાણીસ્તવનં યાજ્ઞ્યવલ્ક્યોક્ત

(દેવીભાગવતતશ્ચ)
અથ પઞ્ચમોઽધ્યાયઃ ।
નારાયણ ઉવાચ ।
વાગ્દેવતાયાઃ સ્તવનં શ્રૂયતાં સર્વકામદમ્ ।
મહામુનિર્યાજ્ઞવલ્ક્યો યેન તુષ્ટાવ તાં પુરા ॥ ૧॥

ગુરુશાપાચ્ચ સ મુનિર્હતવિદ્યો બભૂવ હ ।
તદા જગામ દુહ્ખાર્તો રવિસ્થાનં ચ પુણ્યદમ્ ॥ ૨॥

સમ્પ્રાપ્યતપસા સૂર્યં કોણાર્કે દૃષ્ટિગોચરે ।
તુષ્ટાવ સૂર્યં શોકેન રુરોદ સ પુનઃ પુનઃ ॥ ૩॥

સૂર્યાસ્તં પાઠયામાસ વેદવેદાઙ્ગમીશ્વરઃ ।
ઉવાચ સ્તુહિ વાગ્દેવીં ભક્ત્યા ચ શ્રુતિહેતવે ॥ ૪॥

તમિત્યુક્ત્વા દીનનાથો હ્યન્તર્ધાનં જગામ સઃ ।
મુનિસ્નાત્વા ચ તુષ્ટાવ ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૫॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
કૃપાં કુરુ જગન્માતર્મામેવં હતતેજસમ્ ।
ગુરુશાપાત્સ્મૃતિભ્રષ્ટં વિદ્યાહીનં ચ દુઃખિતમ્ ॥ ૬॥

જ્ઞાનં દેહિ સ્મૃતિં દેહિ વિદ્યાં દેહિ દેવતે ।
પ્રતિષ્ઠાં કવિતાં દેહિ શાક્તં શિષ્યપ્રબોધિકામ્ ॥ ૭॥

ગ્રન્થનિર્મિતિશક્તિં ચ સચ્છિષ્યં સુપ્રતિષ્ઠિતમ્ ।
પ્રતિભાં સત્સભાયાં ચ વિચારક્ષમતાં શુભામ્ ॥ ૮॥

લુપ્તાં સર્વાં દૈવવશાન્નવં કુરુ પુનઃ પુનઃ ।
યથાઽઙ્કુરં જનયતિ ભગવાન્યોગમાયયા ॥ ૯॥

બ્રહ્મસ્વરૂપા પરમા જ્યોતિરૂપા સનાતની ।
સર્વવિદ્યાધિદેવી યા તસ્યૈ વાણ્યૈ નમો નમઃ ॥ ૧૦॥

યયા વિના જગત્સર્વં શશ્વજ્જીવન્મૃતં સદા ।
જ્ઞાનાધિદેવી યા તસ્યૈ સરસ્વત્યૈ નમો નમઃ ॥ ૧૧॥

યયા વિના જગત્સર્વં મૂકમુન્મત્તવત્સદા ।
વાગધિષ્ઠાતૃદેવી યા તસ્યૈ વાણ્યૈ નમો નમઃ ॥ ૧૨॥

હિમચન્દનકુન્દેન્દુકુમુદામ્ભોજસંનિભા ।
વર્ણાધિદેવી યા તસ્યૈ ચાક્ષરાયૈ નમો નમઃ ॥ ૧૩॥

વિસર્ગ બિન્દુમાત્રાણાં યદધિષ્ઠાનમેવ ચ ।
ઇત્થં ત્વં ગીયસે સદ્ભિર્ભારત્યૈ તે નમો નમઃ ॥ ૧૪॥

યયા વિનાઽત્ર સંખ્યાકૃત્સંખ્યાં કર્તું ન શક્નુતે ।
કાલ સંખ્યાસ્વરૂપા યા તસ્યૈ દેવ્યૈ નમો નમઃ ॥ ૧૫॥

વ્યાખ્યાસ્વરૂપા યા દેવી વ્યાખ્યાધિષ્ઠાતૃદેવતા ।
ભ્રમસિદ્ધાન્તરૂપા યા તસ્યૈ દેવ્યૈ નમો નમઃ ॥ ૧૬॥

સ્મૃતિશક્તિર્જ્ઞાનશક્તિર્બુદ્ધિશક્તિસ્વરૂપિણી ।
પ્રતિભાકલ્પનાશક્તિર્યા ચ તસ્યૈ નમો નમઃ ॥ ૧૭॥

સનત્કુમારો બ્રહ્માણં જ્ઞાનં પપ્રચ્છ યત્ર વૈ ।
બભૂવ જડવત્સોઽપિ સિદ્ધાન્તં કર્તુમક્ષમઃ ॥ ૧૮॥

તદાઽઽજગામ ભગવાનાત્મા શ્રીકૃષ્ણ ઈશ્વરઃ ।
ઉવાચ સ ચ તં સ્તૌહિ વાણીમિતિ પ્રજાપતે ॥ ૧૯॥

સ ચ તુષ્ટાવ તાં બ્રહ્મા ચાઽઽજ્ઞયા પરમાત્મનઃ ।
ચકાર તત્પ્રસાદેન તદા સિદ્ધાન્તમુત્તમમ્ ॥ ૨૦॥

યદાપ્યનન્તં પપ્રચ્છ જ્ઞાનમેકં વસુન્ધરા ।
બભૂવ મૂકવત્સોઽપિ સિદ્ધાન્તં કર્તુમક્ષમઃ ॥ ૨૧॥

તદા ત્વાં ચ સ તુષ્ટાવ સન્ત્રસ્તઃ કશ્યપાજ્ઞયા ।
તતશ્ચકાર સિદ્ધાન્તં નિર્મલં ભ્રમભઞ્જનમ્ ॥ ૨૨॥

વ્યાસઃ પુરાણસૂત્રં સમપૃચ્છદ્વાલ્મિકિં યદા ।
var વ્યાસઃ પુરાણસૂત્રશ્ચ સમપૃચ્છતવાલ્મિકિમ્ ।

મૌનીભૂતઃ સ સસ્માર ત્વામેવ જગદમ્બિકામ્ ॥ ૨૩॥

તદા ચકાર સિદ્ધાન્તં ત્વદ્વરેણ મુનીશ્વરઃ ।
સ પ્રાપ નિર્મલં જ્ઞાનં પ્રમાદધ્વંસકારણમ્ ॥ ૨૪॥

પુરાણ સૂત્રં શ્રુત્વા સ વ્યાસઃ કૃષ્ણકલોદ્ભવઃ ।
ત્વાં સિષેવે ચ દધ્યૌ તં શતવર્ષં ચ પુષ્કરે ॥ ૨૫॥

તદા ત્વત્તો વરં પ્રાપ્ય સ કવીન્દ્રો બભૂવ હ ।
તદા વેદવિભાગં ચ પુરાણાનિ ચકાર હ ॥ ૨૬॥

યદા મહેન્દ્રે પપ્રચ્છ તત્ત્વજ્ઞાનં શિવા શિવમ્ ।
ક્ષણં ત્વામેવ સચ્ચિન્ત્ય તસ્યૈ જ્ઞાનં દધૌ વિભુઃ ॥ ૨૭॥

પપ્રચ્છ શબ્દશાસ્ત્રં ચ મહેન્દ્રસ્ય બૃહસ્પતિમ્ ।
દિવ્યં વર્ષસહસ્રં ચ સ ત્વાં દધ્યૌ ચ પુષ્કરે ॥ ૨૮॥

તદા ત્વત્તો વરં પ્રાપ્ય દિવ્યં વર્ષસહસ્રકમ્ ।
ઉવાચ શબ્દશાસ્ત્રં ચ તદર્થં ચ સુરેશ્વરમ્ ॥ ૨૯॥

અધ્યાપિતાશ્ચ યૈઃ શિષ્યાઃ યૈરધીતં મુનીશ્વરૈઃ ।
તે ચ ત્વાં પરિસચ્ચિન્ત્ય પ્રવર્તન્તે સુરેશ્વરિ ॥ ૩૦॥

ત્વં સંસ્તુતા પૂજિતા ચ મુનીન્દ્રમનુમાનવૈઃ ।
દૈત્યૈશ્ચ સુરૈશ્ચાપિ બ્રહ્મવિષ્ણુશિવાદિભિઃ ॥ ૩૧॥

જડીભૂતઃ સહસ્રાસ્યઃ પચ્ચવક્ત્રશ્ચતુર્મુખઃ ।
યાં સ્તોતું કિમહં સ્તૌમિ તામેકાસ્યેન માનવઃ ॥ ૩૨॥

ઇત્યુક્ત્વા યાજ્ઞવલ્ક્યશ્ચ ભક્તિનમ્રાત્મકન્ધરઃ ।
પ્રણનામ નિરાહારો રુરોદ ચ મુહુર્મુહુઃ ॥ ૩૩॥

તદા જ્યોતિઃ સ્વરૂપા સા તેનાઽદૃષ્ટાઽપ્યુવાચ તમ્ ।
સુકવીન્દ્રો ભવેત્યુક્ત્વા વૈકુણ્ઠં ચ જગામ હ ॥ ૩૪॥

મહામૂર્ખશ્ચ દુર્મેધા વર્ષમેકં ચ યઃ પઠેત્ ।
સ પણ્ડિતશ્ચ મેધાવી સુકવિશ્ચ ભવેદ્ધ્રુવમ્ ॥ ૩૫॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે પ્રકૃતિખણ્ડે નારદનારાયણસંવાદે
યાજ્ઞવલ્ક્યોક્ત વાણીસ્તવનં નામ પચ્ચમોઽધ્યાયઃ ॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે નવમસ્કન્ધે
યાજ્ઞવલ્ક્યકૃતં સરસ્વતીસ્તોત્રવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥

brahmavaivartapurANa prakRitikhaNDa adhyAya 5
same as
devIbhAgavata mahApurANa navamaskandha adhyAya 5
Encoded and proofread by
Singanallur Ganesan singanallur at gmail.com

---

*shrISarasvatIstotra by Yajnyavalkya*
pdf was typeset on September 25, 2024

Please send corrections to *sanskrit@cheerful.com*